# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-१ (SEM-2) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – वास्तुशास्त्रम् | **CC-1.2.3** | समयः - ११ तः २ |
| दिनाङ्कः – २२/४/२०१६ | सन्दर्भग्रन्थः – वास्तुतत्त्वविवेकः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **कयोरपि द्वयोः व्याख्या कार्या ।** | ०८ |
| | (१) गृहमध्ये हस्तमितं खात्वा परिपूरितं पुनः श्वभ्रम् ।<br>यद्यूनमविष्टं तत्समे समं धन्यमधिकं यत् ॥<br>(२) दशांशकान् शिरोभागे पृच्छे सप्तदशांशकान् ।<br>त्यजेद्रुदं शिरोभागात् पुच्छादष्टादशं शुभम् ॥<br>(३) उत्तममष्टाभ्यधिकं हस्तशतं नृपगृहं पृथुन्येन ।<br>अष्टांष्टोनान्येवं पञ्च सपादानि दैर्घ्येण ॥ | |
| **प्रश्नः -२** | **एकस्मिन् विषये विस्तारेन वर्णनं कुरु ।** | ०८ |
| | (१) गृहस्य मुख्यद्वारविचारः विशदं वर्णयत ।<br>(२) आयादिलक्षणं विशदं वर्णयत । | |
| **प्रश्नः -३** | **द्वयोः टिप्पणीं लिखत ।** | ०४ |
| | (१) गृहविन्यासविधिः ।<br>(२) गृहारम्भे वृषभचक्रम् ।<br>(३) शुभयोगाः ।<br>(४) भूपरीक्षा । | |
| **प्रश्नः - ४** | **अधोलिखितयोः पञ्चप्रश्नानां लघूत्तराणि लिखत ।** | ०५ |
| | (१) आयः कतिविधः ?<br>(२) मासफलं किम् ?<br>(३) काकिणीसूत्रम् लिखत ।<br>(४) दैत्यपृष्ठभूमिलक्षणम् ।<br>(५) वृषभचक्रे मुखे कति नक्षत्राणि भवन्ति ?<br>(६) गृहस्य प्रधानद्वारं कुत्र प्रयुज्यते ?<br>(७) गृहस्य षोडशकक्षानां नामानि लिखत । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **कयोरपि द्वयोः व्याख्या कार्या ।** | ०८ |
| | (१) यदि स्वर्णमयं वृक्षं गृहमध्ये न रोपयेत् ।<br>अजिरे तुलसीवृक्षं रोपयेदधनाशनम् ॥<br>(२) आसन्नो वल्मीको दक्षिणपार्श्वे विभीतकस्य यदि ।<br>अध्यर्क्ष भवति शिरा पुरुषे ज्ञेया दिशि प्राच्याम् ॥ | |

| | | |
|---|---|---|
| | (३) जालान्तरगे भानौ यदणुतरं दर्शनं रजो याति ।<br>तद्विन्द्यात् परमाणुं प्रथमं तद्धि प्रमाणानाम् । | |
| **प्रश्नः -६** | **एकस्मिन् विषये विस्तारेण वर्णनं कुरु ।** | ०८ |
| | (१) नानाविधप्रतिमालक्षणं विवेचयत ।<br>(२) गृहवारिनिस्सारणं विशदं विवेचयत । | |
| **प्रश्नः -७** | **द्वयोः टिप्पणी लिखत ।** | ०४ |
| | (१) वृक्षारोपणविचारः<br>(२) आंगनविचारः<br>(३) कलशचक्रम्<br>(४) गृहप्रवेशविधिः | |
| **प्रश्नः -८** | **अधोलिखितयोः पञ्चप्रश्नानां उत्तराणि लिखत ।** | ०५ |
| | (१) सचिवालयसमीपे गृहफलं किम् ?<br>(२) गजलक्षणं लिखत ।<br>(३) शिवपञ्चायतनदेवालये के देवाः ?<br>(४) आग्नेये-कूपस्य फलम् किम् ?<br>(५) प्रतिमायाः प्रकाराः कति ?<br>(६) अधिवासमण्डप-अलङ्करणं किम् ?<br>(७) कुण्डलक्षणं किम् ? | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -९** | **द्वयोः सान्वयं व्याख्यां कुरु ।** | ०८ |
| | (१) यथाचलो गुरुर्मेरूदावा समचलं मम ।<br>आरोपितं गृहस्तम्भं तथा त्वमचलं कुरु ॥<br>(२) विशन्तु भूतले नागा लोकपालाश्च सर्वतः ।<br>अस्मिन् गृहेऽवतिष्ठन्तु आयुर्बलकराः सदा ॥<br>(३) आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।<br>उद्धृतासि वराहेण सशैलवनकानने ॥ | |
| **प्रश्नः -१०** | **एकस्मिन् विषये विस्तारेण वर्णनं कुरु।** | ०८ |
| | (१) गृहप्रवेशविधिः विशदं वर्णयत ।<br>(२) नक्षत्रादिवनविचारः विशदं वर्णयत । | |
| **प्रश्नः -११** | **एकमेव टिप्पणीं लिखत ।** | ०२ |
| | (१) भवनस्य् आवश्यक अङ्गानि स्थानाणि च ।<br>(२) वास्तुपूजाविधिः । | |
| **प्रश्नः -१२** | **द्वयोः लघूत्तरं लिखत ।** | ०२ |
| | (१) भद्राप्रतिष्ठा कुत्र भवति ?<br>(२) पञ्चगव्यस्नाने किं प्रयुज्यते ?<br>(३) मलिनब्रह्मस्थानं किं फलम् ? | |

***